ष्मितया वातहरसिद्धस्नेहाभ्यक्तगात्रो वाष्पमपहरेत्। वाष्पो ह्यनूर्द्ध्वगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाड़ीस्वेदः३। वातिकोत्तरवातिकानां पुनर्मूलादीनामुत्क्वाथैः सुखोष्णैः कुम्भीर्वार्धुलिकाः प्रनाड़ीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः ४। वातहरोत्क्वाथक्षीरतैलघृतपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहः" ५। "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत इत्यादि"। (जेन्ताकशब्दे ३१४४ पृ० अस्य लक्षणाद्युक्तप्रायम्६।) "शयानस्य प्रमाणेन घनामश्ममयीं शिलाम्। तापयित्वा मारुतघ्नैर्दारुभिः सम्प्रदीपितैः। व्यपोह्याथ सर्वानङ्गारान् प्रोक्ष्य चैवोष्णवारिणा। तां शिलामथ कुर्वीत कौषेयाविकसंस्तराम्। तस्यां स्वभ्यक्तसर्वाङ्गः शयानः स्विद्यते सुखम्। रौरवाजिनकौषेयप्रावाराद्यैः सुसंवृतः। इत्युक्तोऽश्मघनस्वेदः७। कर्षूस्वेदः प्रवक्ष्यते। खानयेच्छयनस्याधः कर्षूं स्थानविभागवित्। दीप्तैरधूमैरङ्गारैस्तां कर्षूं पूरयेत् ततः। तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखम्८। अनत्युत्सेधविस्तारां वृत्ताकारामलोचनाम्। घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः सम्प्रलेपयेत्। कुटीमध्ये भिषक् शय्यां स्वास्तीर्णाञ्चोपकल्पयेत्। प्रावाराजिनकौषेयकुथ्यकम्बलगोलकैः। हसन्तिकाभिरङ्गारपूर्णाभिस्तां च सर्वशः। परिवार्य्यान्तरारोहेदभ्यक्तः स्विद्यते सुखम्९। य एवाश्मघनस्वेदविधिर्भूमौ स एव तु। प्रशस्तायां निवातायां समायामुपदिश्यते१०। कुम्भीं वातहरक्वाथपूर्णां भूमौ निखातयेत्। अर्द्धभागं त्रिभागं वा शयनं तत्र चोपरि। स्थापयेदासनं वापि नातिसान्द्रपरिच्छदम्। अथ कुम्भ्यां सुसन्तप्तान् प्रक्षिपेदयसो गुड़ान्। पाषाणान् वोष्मणा तेन तत्स्थः स्विद्यति ना सुखम्११। सुसंवृताङ्गः स्वभ्यक्तः स्नेहैरनिलनाशनैः। कूपं शयनविस्तारं द्विगुणञ्चापि वेधतः। देशे निवाते शस्ते च कुर्य्यादन्तः सुमार्जितम्। हस्त्यश्वगोखरोष्ट्राणां करीषैर्दग्धपूरिते। स्ववच्छन्नः सुसंस्तीर्णेऽभ्यक्तः स्विद्यति ना सुखम्१२। वीधीकान्तु करीषाणां यथोक्तानां प्रदीपयेत्। शयनान्तःप्रमाणेन शय्यामुपरि तत्र च। सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत्। स्ववच्छन्नः स्वपंस्तत्राभ्यक्तः स्विद्यति ना सुखम्। होलाकस्वेद१३ इत्येष सुखः प्रोक्तो महर्षिणेति"। इति त्रयोदशविधः स्वेदोऽग्निगुणसंश्रयः। व्यायाम उष्णसदनं गुरुप्रावरणं क्षुधा। बहुपानं भयक्रोधावुपनाहाहवातपाः। स्वेदयन्ति दशैतानि नरमग्निगुणादृते। इत्युक्तो द्विविधः स्वेदः संयुक्तोऽग्निगुणैर्न च। एकाङ्गसर्वाङ्गगतः स्निग्धो रूक्षस्तथैव च। इत्येतत् त्रिविधं द्वन्द्वं स्वेदमुद्दिश्य कीर्त्तितम्। स्निग्धः स्वेदैरुपक्रम्यः स्विन्नः पथ्याशनो भवेत्। तदहः स्विन्नगात्रस्तु व्यायामं वर्जयेन्नरः" इति। तत्र श्लोकाः "स्वेदो यथा कार्य्यकरो हितो येभ्यश्च यद्विधः। यत्र देशे यथायोग्या देशो रक्ष्यश्च यो यथा। स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजम्। अस्वेद्याः स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना। त्रयोदशविधः स्वेदो विना दशविधोऽग्निना। संग्रहेण च षट्स्वेदाः स्वेदाध्याये निदर्शिताः। स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा। शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुरिति"।

**स्वेदज** पु० स्वेदाज्जायते जन–ड। १स्वेदजाते दंशादिजन्तौ अमरः २स्वेदजातमात्रे त्रि०।

"संस्वेदजविकाराश्च यथा येभ्यो भवन्ति च। मानुषस्वेदमलजा मक्षिकाद्या भवन्ति च। नवमेघप्रसिक्तायां पिपीलिकगणादयः। संस्वेदजास्तु विज्ञेया वृक्षगोपशुजन्तवः। समिद्भ्यो माषमुद्गेभ्यः फलेभ्यश्चैव जन्तवः। जायन्ते क्रिमयो विप्राः! काष्ठेभ्यो घुणकादयः। तथा शुक्रविकारेभ्यः पूतिकाः प्रभवन्ति च। संस्वेदजाश्च जायन्ते वृश्चिकाः शुष्कगोमयात्। गोभ्यो हि महिषेभ्यश्च मानुषेभ्यश्च जन्तवः। मत्स्यादिभ्यश्च विविधा अन्तःकुक्षौ विशेषतः। अघान्यानि च सूक्ष्माणि सूक्ष्मयूकास्तथैव च। गोभ्योऽश्वेभ्यस्तथा चैव अष्टापदकमीनकाः। माक्षिकाणां विकाराश्च वृत्तस्फोटककर्दमैः। शरावति विकाराश्च करीषेभ्यो भवन्ति हि। एवमादिरसंख्यातो गणः संस्वेदजो मया। सर्वासान्निहितो ह्येष प्राक्कर्मवशगः स्मृतः" वह्निपु०।

**स्वेदन** न० स्विद–णिच् ल्युट्। गात्रादितो घर्मादेर्निःसारणव्यापारे (भापरा)। स्वेदशब्दे दृश्यम्।

**स्वेदनी** स्त्री स्विद्यते पच्यतेऽनया स्विद्–ल्युट्। लौहपात्रभेदे (ताओया) अमरः। संज्ञायां कन् टापि ह्रस्वः। स्वेदनिका कन्दुरूपे पात्रे हेमच० भर्जनपात्रे शब्दमा०।

**स्वैर** न० स्वस्य ईरम् ईर–अच् वृद्धिः। १स्वेच्छायाम् २तद्वति ३मन्दे च त्रि० मेदि०।

**स्वैरिन्** त्रि० स्वेनैव ईरयितुं शीलमस्य ईर–णिनि वृद्धिः। १स्वेच्छाचारिणि स्वतन्त्रे। २व्यभिचारिस्त्रियां स्त्री